# shivamahimastotram

# શિવમહિમસ્તોત્રમ્

## Document Information

Text title : shivamahimastotram

File name : shivamahimastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Source : Shandapurana

Latest update : March 25, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શિવમહિમ્સ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

શ્રીવિષ્ણુરુવાચ ।
મહેશાનન્તાદ્ય ત્રિગુણરહિતામેયવિમલ
    સ્વરાકારાપારામિતગુણગણાકારિનિવૃતે ।
નિરાધારાધારામરવર નિરાકાર પરમ
    પ્રભાપૂરાકારાવર પર નમો વેદ્ય શિવ તે ॥ ૧॥

નમો વેદાવેદ્યાખિલજગદુપાદાન નિયતં
    સ્વતન્ત્રાસામાન્તાનવધુતિનિજાકારવિરતે ।
નિવર્તન્તે વાચઃ શિવભજનમપ્રાપ્ય મનસા
    યતોઽશક્તાઃ સ્તોતું સકૃદપિ ગુણાતીત શિવ તે ॥ ૨॥

ત્વદન્યદ્વસ્ત્વેકં ન હિ ભવ સમસ્તત્રિભુવને
    વિભુસ્ત્વં વિશ્વાત્મા ન ચ પરમમસ્તીશ ભવતઃ ।
ધ્રુવં માયાતીતસ્ત્વમસિ સતતં નાત્ર વિષયો
    ન તે કૃત્યં સત્યં ક્વચિદપિ વિપર્યેતિ શિવ તે ॥ ૩॥

ત્વયૈવેમં લોકં નિખિલમમલં વ્યાપ્ય સતતં
    તથૈવાન્યાં લોકસ્થિતિમનઘ દેવોત્તમ વિભો ।
ત્વયૈવૈતત્સૃષ્ટં જાદખિલમીશાન ભગવન્-
    વિલાસોઽયં કશ્ચિત્તવ શિવ નમો વેદ્ય શિવ તે ॥ ૪॥

જગત્સૃષ્ટેઃ પૂર્વં યદભવદુમાકાન્ત સતતં
    ત્વયા લીલામાત્રં તદપિ સકલં રક્ષિતમભૂત્ ।
તદેવાગ્રે ભાલપ્રકટનયનાદ્ભુતકર-
    આજ્જગદ્ગ્ધ્વા સ્થાસ્ચસ્ચજ હર નમો વેદ્ય શિવ તે ॥ ૫॥

વિભૂતીનામન્તો ભવ ન ભવતો ભૂતિવિલસન્-

નિજાકાર શ્રીમન્ન ગુણગણસીમાપ્યવગતા ।
અતદ્વ્યાવૃત્યાઽદ્ધા ત્વયિ સકલવેદાશ્ચ ચકિતા
ભવન્ત્યેવાસામપ્રકૃતિક નમો ધર્ષ શિવ તે ॥ ૬॥

વિરાડ્રૂપં યત્તે સકલનિગમાગોચરમભૂત્-
તદેવેદં રૂપં ભવતિ કિમિદં ભિન્નમથવા ।
ન જાને દેવેશ ત્રિનયન સુરારાધ્યચરણ
ત્વઓઙ્કારો વેદસ્ત્વમસિ હિ નમોઽઘોર શિવ તે ॥ ૭॥

યદન્તસ્તત્ત્વજ્ઞા મુનિવરગણા રૂપમનઘં
તવેદં સઞ્ચિન્ત્ય સ્વમનસિ સદાઽઽસન્નવિહતાઃ ।
યયુર્દિવ્યાનન્દં તદિદમથવા કિં તુ ન તથા
કિમેતજ્જાનેઽહં શરણદ નમઃ શર્વ શિવ તે ॥ ૮॥

તથા શક્ત્યા સૃષ્ટ્વા જગદથ ચ સંરક્ષ્ય બહુધા
તતઃ સંહૃત્યૈતન્નિવસતિ તદાધારમથવા ।
ઇદં તે કિં રૂપં નિરુપમ ન જાને હર વિભો
વિસર્ગઃ કો વા તે તમપિ હિ નમો ભવ્ય શિવ તે ॥ ૯॥

તવાનન્તાન્યાહુઃ શુચિપરમરૂપાણિ નિગમા-
સ્તદન્તર્ભૂતં સત્સદસદનિરુક્તં પદમપિ ।
નિરુક્તં છન્દોભિર્નિલયનમિદં વાનિલયનં
ન વિજ્ઞાતં જ્ઞાતં સકૃદપિ નમો જ્યેષ્ઠ શિવ તે ॥ ૧૦॥

તવાભૂત્સત્યં ચાનૃતમપિ ચ સત્યં કૃતમભૂ-
દૃતં સત્યં સત્યં તદપિ ચ યથા રૂપમખિલમ્ ।
યતઃ સત્યં સત્યં શમમપિ સમસ્તં તવ વિભો
કૃતં સત્યં સત્યાનૃતમપિ નમો રુદ્ર શિવ તે ॥ ૧૧॥

તવામેયં મેયં યદપિ તદમેયં વિરચિતં
ન વામેયં મેયં રચિતમપિ મેયં વિરચિતુમ્ ।
ન મેયં મેયં તે ન ખલુ પરમેયં પરમયં
ન મેયં ન નામેયં વરમપિ નમો દેવ શિવ તે ॥ ૧૨॥

તવાહારં હારં વિદિતમવિહારં વિરહસં
નવાહારં હારં હર હરસિ હારં ન હરસિ ।
ન વાહારં હારં પરતરવિહારં પરતરં

પરં પારં જાને ન હિ ખલુ નમો વિશ્વશિવ તે ॥ ૧૩॥

યદેતત્તત્ત્વં તે સકલમપિ તત્ત્વેન વિદિતં
ન તે તત્ત્વં તત્ત્વં વિદિતમપિ તત્ત્વેન વિદિતમ્ ।
ન ચૈતત્તત્ત્વં ચેન્નિયતમપિ તત્ત્વં કિમુ ભવે
ન તે તત્ત્વં તત્ત્વં તદપિ ચ નમો વેદ્ય શિવ તે ॥ ૧૪॥

ઇદં રૂપં રૂપં સદસદમલં રૂપમપિ ચેન્-
ન જાને રૂપં તે તરતમવિભિન્નં પરતરમ્ ।
યતો નાન્યદ્રૂપં નિયતમપિ વેદૈર્નિગદિતં
ન જાને સર્વાત્મન્ ક્વચિદપિ નમોઽનન્ત શિવ તે ॥ ૧૫॥

મહદ્ભૂતં ભૂતં યદપિ ન ચ ભૂતં તવ વિભો
સદા ભૂતં ભૂતં કિમુ ન ભક્તો ભૂતવિષયે ।
યદાભૂતં ભૂતં ભવતિ હિ ન ભવ્યં ભગવતો
ભવાભૂતં ભાવ્યં ભવતિ ન નમો જ્યેષ્ઠ શિવ તે ॥ ૧૬॥

વશીભૂતા ભૂતા સતતમપિ ભૂતાત્મકતયા
ન તે ભૂતા ભૂતાસ્તવ યદપિ ભૂતા વિભુતયા ।
યતો ભૂતા ભૂતાસ્તવ તુ ન હિ ભૂતાત્મકતયા
ન વા ભૂતા ભૂતાઃ ક્વચિદપિ નમો ભૂત શિવ તે ॥ ૧૭॥

ન તે માયામાયા સતતમપિ માયામયતયા
ધ્રુવં માયામાયા ત્વયિ વર ન માયામયમપિ ।
યદા માયામાયા ત્વયિ ન ખલુ માયામયતયા
ન માયામાયા વા પરમય નમસ્તે શિવ નમઃ ॥ ૧૮॥

યતન્તઃ સંવેદ્યં વિદિતમપિ વેદૈર્ન વિદિતં
ન વેદ્યં વેદ્યં ચેન્નિયતમપિ વેદ્યં ન વિદિતમ્ ।
તદેવેદં વેદ્યં વિદિતમપિ વેદાન્તનિકરૈઃ
કરાવેદ્યં વેદ્યં જિતમિતિ નમોઽતર્ક્ય શિવ તે ॥ ૧૯॥

શિવં સેવ્યં ભાવં શિવમતિશિવાકારમશિવં
ન સત્યં શૈવં તચ્છિવમિતિ શિવં સેવ્યમનિશમ્ ।
શિવં શાન્તં મત્વા શિવપરમતત્ત્વં શિવમયં
ન જાને રૂપત્વં શિવમિતિ નમો વેદ્ય શિવ તે ॥ ૨૦॥

યદજ્ઞાત્વા તત્ત્વં સકલમપિ સંસારપતિતં
    જગજ્જન્માવૃત્તિં દહતિ સતતં દુઃખનિલયમ્ ।
યદેતજ્જ્ઞાત્વૈવાવહતિ ચ નિવૃત્તિં પરતરાં
    ન જાને તત્તત્ત્વં પરમિતિ નમો વેદ્ય શિવ તે ॥ ૨૧॥

ન વેદં યદ્રૂપં નિગમવિષયં મઙ્ગલકરં
    ન દૃષ્ટં કેનાપિ ધ્રુવમિતિ વિજાને શિવ વિભો ।
તતશ્ચિત્તે શમ્ભો ન હિ મમ વિષાદોઽઘવિકૃતિઃ
    પ્રયત્નાલ્લબ્ધેઽસ્મિન્ન કિમપિ નમઃ પૂર્ણ શિવ તે ॥ ૨૨॥

તવાકર્ણ્યાગૂઢં યદપિ પરતત્ત્વં શ્રુતિપરં
    તદેવાતીતં સન્નયનપદવીં નાત્ર તનુતે ।
કદાચિત્કિઞ્ચિદ્વા સ્ફુરતિ કતિધા ચેતસિ તવ
    સ્ફુરદ્રૂપં ભવ્યં ભવહર પરાવેદ્ય શિવ તે ॥ ૨૩॥

ત્વમિન્દુર્ભાનુસ્ત્વં હુતભુગસિ વાયુશ્ચ સલિલં
    ત્વમેવાકાશોઽસિ ક્ષિતિરસિ તથાઽઽત્માઽસિ ભગવન્ ।
તતઃ સર્વાકારસ્ત્વમસિ ભવતો ભિન્નમનઘાન્-
    ન તત્સત્યં સત્યં ત્રિનયન નમોઽનન્ત શિવ તે ॥ ૨૪॥

વિધું ધત્સે નિત્યં શિરસિ મૃદુકણ્ઠોઽપિ ગરલં
    નવં નાગાહારં ભસિતમમલં ભાસુરતનુમ્ ।
કરે શૂલં ભાલે જ્વલનમનિશં તત્કિમિતિ તે
    ન તત્ત્વં જાનેઽહં ભવહર નમઃ કૂર્પ શિવ તે ॥ ૨૫॥

તવાપા ણ્ગઃ શુદ્ધો યદિ ભવતિ ભવ્યે શુભકરઃ
    કદાચિત્કસ્મિંશ્ચિલ્લઘુતરનરે વિપ્રભવતિ ।
સ એવૈતાઁલ્લોકાન્ રચયિતુમલં સાપિ ચ મહાન્
    કૃપાધારોઽયં સુખયતિ નમોઽનન્ત શિવ તે ॥ ૨૬॥

ભવન્તં દેવેશં શિવમિતરગીર્વાણસદૃશં
    પ્રમાદાદ્યઃ કશ્ચિદ્યદિ યદપિ ચિત્તેઽપિ મનુતે ।
સ દુઃખં લબ્ધ્વાઽન્તે નરકમપિ યાતિ ધ્રુવમિદં
    ધ્રુવં દેવારાધ્યામિતગુણ નમોઽનન્ત શિવ તે ॥ ૨૭॥

પ્રદોષે રત્નાઢ્યે મૃદુલતરસિંહાસનવરે
    ભવાનીમારૂઢામસકૃદપિ સંવીક્ષ્ય ભવતા ।

કૃતં સમ્યન્નાટ્યં પ્રથિતમિતિ વેદોઽપિ ભવતિ
    પ્રભાવઃ કો વાઽયં તવ હર નમો દીપ શિવ તે ॥ ૨૮॥

સ્મશાને સઞ્ચારઃ કિમુ શિવ ન તે ક્વાપિ ગમનં
    યતો વિશ્વં વ્યાપ્યાખિલમપિ સદા તિષ્ઠતિ ભવાન્ ।
વિભું નિત્યં શુદ્ધં શિવમુપહતં વ્યાપકમિતિ
    શ્રુતિઃ સાક્ષાદ્વક્તિ ત્વયમપિ નમઃ શુદ્ધ શિવ તે ॥ ૨૯॥

ધનુર્મેરુઃ શેષો ધનુવરગુણો યાનમવનિ-
    સ્તવૈવેદં ચક્રં નિગમનિકરા વાજિનિકરાઃ ।
પુરોલક્ષ્યં યન્તા વિધિરિષુહરિશ્ચેતિ નિગમઃ
    કિમેવં ત્વન્વેષ્યો નિગદતિ નમઃ પૂર્ણ શિવ તે ॥ ૩૦॥

મૃદુઃ સત્ત્વં ત્વેતદ્ભવમનઘયુક્તં ચ રજસા
    તમોયુક્તં શુદ્ધં હરમપિ શિવં નિષ્કલમિતિ ।
વદત્યેકો વેદસ્ત્વમસિ તદુપાસ્યં ધ્રુવમિદં
    ત્વમોઙ્કારાકારો ધ્રુવમિતિ નમોઽનન્ત શિવ તે ॥ ૩૧॥

જગત્સુપ્તિં બોધં વ્રજતિ ભવતો નિર્ગતમપિ
    પ્રવૃત્તિં વ્યાપારં પુનરપિ સુષુપ્તિં ચ સકલમ્ ।
ત્વદન્યં ત્વત્પ્રેક્ષ્યં વ્રજતિ શરણં નેતિ નિગમો
    વદત્યદ્ધા સર્વઃ શિવ ઇતિ નમઃ સ્તુત્ય શિવ તે ॥ ૩૨॥

ત્વમેવાલોકાનામધિપતિરુમાનાથ જગતાં
    શરણ્યઃ પ્રાપ્યસ્ત્વં જલનિધિરિવાનન્તપયસામ્ ।
ત્વદન્યો નિર્વાણં તટ ઇતિ ચ નિર્વાણયતિર-
    પ્યતઃ સર્વોત્કૃષ્ટસ્ત્વમસિ હિ નમો નિત્ય શિવ તે ॥ ૩૩॥

તવૈવાંશો ભાનુસ્તપતિ વિધુરપ્યેતિ પવનઃ
    પવત્યેષોઽગ્નિશ્ચ જ્વલતિ સલિલં ચ પ્રવહતિ ।
તવાજ્ઞાકારિત્વં સકલસુરવર્ગસ્ય સતતં
    ત્વમેકઃ સ્વાતન્ત્ર્યં વહસિ હિ નમોઽનન્ત શિવ તે ॥ ૩૪॥

સ્વતન્ત્રોઽયં સોમઃ સકલભુવનૈકપ્રભુરયં
    નિયન્તા દેવાનામપિ હર નિયન્તાસિ ન પરઃ ।
શિવઃ શુદ્ધા માયારહિત ઇતિ વેદોઽપિ વદતિ
    સ્વયં તામાશાસ્ય ત્રયહર નમોઽનન્ત શિવ તે ॥ ૩૫॥

નમો રુદ્રાનન્તામરવર નમઃ શઙ્કર વિભો
    નમો ગૌરીનાથ ત્રિનયન શરણ્યાઙ્ઘ્રિકમલ ।
નમઃ શર્વ શ્રીમન્નનઘ મહદૈશ્વર્યનિલય
    સ્મરારે પાપારે જય જય નમઃ સેવ્ય શિવ તે ॥ ૩૬॥

મહાદેવામેયાનઘગુણગણપ્રામવસતન્-
    નમો ભૂયો ભૂયઃ પુનરપિ નમસ્તે પુનરપિ ।
પુરારાતે શમ્ભો પુનરપિ નમસ્તે શિવ વિભો
    નમો ભૂયો ભૂયઃ શિવ શિવ નમોઽનન્ત શિવ તે ॥ ૩૭॥

કદાચિદ્વણ્યન્તે નિબિડનિયતવૃષ્ટિકણિકાઃ
    કદાચિત્તત્ક્ષેત્રાણ્યપિ સિકતલેશં કુશલિના ।
અનન્તૈરાકલ્પં શિવ ગુણગણશ્ચારુરસનૈ-
    ર્ન શક્યં તે નૂનં ગણયિતુમુષિત્વાઽપિ સતતમ્ ॥ ૩૮॥

મયા વિજ્ઞાયૈષાઽનિશમપિ કૃતા જેતુમનસા
    સકામેનામેયા સતતમપરાધા બહુવિધાઃ ।
ત્વયૈતે ક્ષન્તવ્યાઃ ક્વચિદપિ શરીરેણ વચસા
    કૃતૈર્નૈતૈર્નૂનં શિવ શિવ કૃપાસાગર વિભો ॥ ૩૯॥

પ્રમાદાદ્યે કેચિદ્વિતતમપરાધા વિધિહતાઃ
    કૃતાઃ સર્વે તેઽપિ પ્રશમમુપયાન્તુ સ્ફુટતરમ્ ।
શિવ શ્રીમચ્છમ્ભો શિવશિવ મહેશેતિ ચ જપન્
    ક્વચિલ્લિઙ્ગાકારે શિવ હર વસામિ સ્થિરતરમ્ ॥ ૪૦॥

ઇતિ સ્તુત્વા શિવં વિષ્ણુઃ પ્રણમ્ય ચ મુહુર્મુહુઃ ।
નિર્વિણ્ણો ન્યવસન્નૂનં કૃતાઞ્જલિપુટઃ સ્થિરમ્ ॥ ૪૧॥

તદા શિવઃ શિવં રૂપમાદાયોવાચ સર્વગઃ ।
ભીષયન્નખિલાન્ભૂતાન્ ઘનગમ્ભીરયા ગિરા ॥ ૪૨॥

મદીયં રૂપમમલં કથં જ્ઞેયં ભવાદૃશૈઃ ।
યત્તુ વેદૈરવિજ્ઞાતમિત્યુક્ત્વાઽન્તર્દધે શિવઃ ॥ ૪૩॥

તતઃ પુનર્વિધિસ્તત્ર તપસ્તપ્તું સમારભત્ ।
વિષ્ણુશ્ચ શિવતત્ત્વસ્ય જ્ઞાનાર્થમતિયત્નતઃ ॥ ૪૪॥

તાદૃશી શિવ મે વાઞ્છા પૂજયિત્વા વદામ્યહમ્ ।
નાન્યો મયાઽર્ચ્યો દેવેષુ વિના શમ્ભું સનાતનમ્ ॥ ૪૫॥

ત્વયાપિ શાઙ્કરં લિઙ્ગં પૂજનીયં પ્રયત્નતઃ ।
વિહાયૈવાન્યદેવાનાં પૂજનં શેષ સર્વદા ॥ ૪૬॥

ઇતિ શ્રીસ્કન્દપુરાણે વિષ્ણુવિરચિતં શિવમહિમસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shivamahimastotram*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*